# कर्तव्यपालनम्।

---

## पाठ्यपुस्तक के प्रश्नोत्तर

### मौखिक प्रश्न

**प्रश्न 1. अधोलिखितानां पदानाम् उच्चारणं कुरुत**
राजतन्त्रज्ञः
दरिद्रेभ्यः
उटजं
अपहर्तुं
प्रबोधितवन्तः
राशिरेवास्ति
दातव्याः
इत्यपृच्छन्
महामात्याः
चाणक्याय
कम्बला:
मातृवत्
लोष्ठवत्
त्यक्तवन्तः

**उत्तरम्:** [ **नोट**-उपर्युक्त शब्दों का शुद्ध उच्चारण अपने अध्यापकजी की सहायता से कीजिए।]

**प्रश्न 2. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत**

**(क) मगधदेशस्य नृपः कः आसीत्?**

**उत्तरम्:** चन्द्रगुप्तः

**(ख) एकस्मिन् उटजे कः निवसति स्म?**

**उत्तरम्:** चाणक्यः

**(ग) चाणक्यस्य उटजं के प्राविशन्? .**

**उत्तरम्:** चौरा:

**(घ) चौरा: केन कारणेन आश्चर्यचकिता: अभवन्?**

**उत्तरम्:** नूतनकम्बलानां राशि: भूत्वाऽपि चाणक्य: जीर्णकम्बलं धृत्वा शेते इति दृष्ट्वा ते आश्चर्यचकिता अभवन्

**(ङ) परद्रव्यं कीदृशं भवति?**

**उत्तरम्:** लोष्ठवत्

## लिखितप्रश्नाः

**प्रश्न 1. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत**

**(क) चन्द्रगुप्तस्य मन्त्री कः आसीत्?**

**उत्तरम्:** चाणक्यःअथवा चन्द्रगुप्तस्य मन्त्री चाणक्यः आसीत्

**(ख) एकदा नृपेण चाणक्याय किं समर्पितम्?**

**उत्तरम्:** कम्बलाः

**(ग) के कम्बलान् अपहर्तुं चिन्तितवन्तः?**

**उत्तरम्:** चौराः

**(घ) तेषां उपयोगं कर्तुं मम ने अधिकारः इति कः कथयति?**

**उत्तरम्:** चाणक्यः

**प्रश्न 3. अधोलिखिताना प्रश्नानां उत्तराणि एकवाक्येन लिखत**

(क) मन्त्री कुत्र निवसति स्म?

**उत्तरम्:** मन्त्री एकस्मिन् उटजे निवसति स्म

(ख) नृपः कम्बलान् केभ्य: दातुं सूचितवान्?

**उत्तरम्:** नृपः कम्बलान् दरिद्रेभ्यः दातुं सूचितवान्

(ग) कम्बलान् अपहर्तुं के चिन्तितवन्तः?

**उत्तरम्:** कम्बलान् अपहर्तुं चौरा: चिन्तितवन्तः

(घ) चौरा: चाणक्यं किम् अपृच्छन्?

**उत्तरम्:** चौरा: चाणक्यं अपृच्छन् यत् तव पाश्र्वे नूतनकम्बलानां राशिः अस्ति तथापि जीर्णकम्बलं धृत्वा किमर्थं शयनं करोति

**प्रश्न 4. निम्नलिखितवाक्यानि निर्देशानुसारं काल (लकारं) परिवर्तनं कृत्वा पुनः लिखत**

**उदाहरणम्:**
चन्द्रगुप्त: मगधदेशस्य नृपः अस्ति।(लङ् लकार)
चन्द्रगुप्त: मगधदेशस्य नृपः आसीत्

(क) मन्त्री एकस्मिन् उटजे निवसति। (लङ् लकार)

**उत्तरम्:** मन्त्री एकस्मिन् उटजे अनिवसत्

(ख) प्रभाते वितरणं करोमि।(लृट् लकार)

**उत्तरम्:** प्रभाते वितरणं करिष्यामि

(ग) अन्येषां द्रव्यस्य उपयोगेन अधर्मः भविष्यति(लट् लकार)

**उत्तरम्:** अन्येषां द्रव्यस्य उपयोगेन अधर्मः भवति

( घ) अन्यस्य द्रव्यं न अपहरिष्याम: (लट् लकार)

**उत्तरम्:** अन्यस्य द्रव्यं न अपहराम:

(ङ) चाणक्य: कम्बलं विना निद्रां करिष्यति ( लट् लकार)

**उत्तरम्:** चाणक्य कम्बल विना निद्रां करोति

**प्रश्न 5. निम्नपदान् स्वीकृत्य वाक्यरचनां कुरुत**

**उत्तरम्:**
उटजे – तपस्वी तस्मिन् उटजे निवसति
निवसति – अत्र एकः ब्राह्मणः निवसति
भावनया – सदा पवित्रभावनया कार्यं कुरुते
समर्पिता: – तेन कम्बलाः तस्मै समर्पिताः
दातुम् – स: धनं दातुं कथयति
अपहर्तुम् – चौर: धनम् अपहर्तुम् आगतः
प्रबोधित: – तेन धनिकः प्रबोधितः
स्वः – बालकः स्वकार्यं करोति
प्रतिदिनम् – वयं प्रतिदिनं क्रीडामः

योग्यता-विस्तारः
चाणक्य के विषय में अन्य कथाएक बार मुगल-सेनापति चाणक्य की झोंपड़ी में आया रात का समय था चाणक्य कुछ राजकार्य कर रहा था उसने उठकर पहले दीपक को बुझाया और उसके बाद उसने दूसरे दीपक को जलाकर सेनापति से वार्तालाप किया सेनापति ने उसका कारण पूछा  चाणक्य बोला ”महोदय  पहले मैं राजकार्य कर रहा था। इसलिए मैंने राज्य के तेल का उपयोग किया। अब मैं आपके साथ वार्तालाप में राज्य के तेल का उपयोग नहीं कर सकता हूँ। अहो ! इस प्रकार के महामन्त्री चाणक्थे।”

# अन्य महत्त्वपूर्ण प्रश्नोत्तर

## वस्तुनिष्ठ प्रश्नाः

**1.’कर्तव्यपालनम्’ पाठस्य क्रमः अस्ति**
(क) चतुर्दशः
(ख) षोडशः
(ग) एकादशः
(घ) त्रयोदशः

**2.’मन्त्री अपि स एकस्मिन् उटजे निवसति’–अत्र अव्ययपदम् अस्ति**
(क) उटजे
(ख) स
(ग) मन्त्री
(घ) अपि

**3.’कम्बलान् दरिद्रेभ्यः दातुं नृपः सूचितवान्’-रेखांकितपदे विभक्तिः वर्तते**
(क) चतुर्थी
(ख) तृतीया
(ग) षष्ठी
(घ) द्वितीया

**4.‘ते दरिद्रेभ्यः दातव्याः’-रेखांकितपदे प्रत्ययः विद्यते**
(क) तव्यत्
(ख) क्तवतु
(ग) क्त्वा
(घ) तमप्

**5.अहं विरक्तः सदा तृप्तः इति अस्मिन् वाक्ये सर्वनामपदं किम्?**
(क) सदा
(ख) विरक्तः
(ग) अहं
(घ) तृप्तः

**6.चन्द्रगुप्तः कस्य देशस्य नृपः आसीत्?**
(क) मगधदेशस्य
(ख) अवधदेशस्य
(ग) महाराष्ट्रस्य
(घ) बंगप्रदेशस्य

**7.चन्द्रगुप्तस्य मन्त्री कः आसीत्?**
(क) चारुदत्तः
(ख) शुकनासः
(ग) सुमन्तः
(घ) चाणक्यः

**8.सर्वभूतेषु आत्मवत् कः पश्यति?**
(क) मूर्खः
(ख) पण्डितः
(ग) कृपणः
(घ) अधमः

**उत्तराणि:**
1. (ख)
2. (घ)
3. (क)
4. (क)
5. (ग)
6. (क)
7. (घ)
8. (ख)

मञ्जूषात् पदं चित्वा रिक्तस्थानानि पूरयत
आसीत्, अकुर्वन्, प्राविशन्, दत्ताः।

1. चौराः चौर्यं नः……….।
2. चन्द्रगुप्तः मगधदेशस्य नृपः……….।
3. कम्बलाः नृपणं……….।
4. ते रात्रौ उटजं ………..।

**उत्तराणि:**
1. अकुर्वन्
2. आसीत्
3. दत्ताः
4. प्राविशन्

## अतिलघूत्तरात्मकप्रश्नाः

**(एकपदेन उत्तरत)**

**प्रश्न 1. चाणक्यः कया भावनया पूर्णः आसीत्?**

**उत्तरम्:** वैराग्यभावनया

**प्रश्न 2. नृपः कम्बलान् केभ्यः दातुं सूचितवान्?**

**उत्तरम्:** दरिद्रेभ्यः

**प्रश्न 3. चाणक्यः कस्य महामन्त्री आसीत्?**

**उत्तरम्:** चन्द्रगुप्तस्य

**प्रश्न 4. चौरा: कम् प्रबोधितवन्तः?**

**उत्तरम्:** चाणक्यम्।

## लघूत्तरात्मकप्रश्नाः

**(पूर्णवाक्येन उत्तरत)**

**प्रश्न 1. चाणक्यस्य उटणं कुत्र आसीत् ?**

**उत्तरम्:** चाणक्यस्य उटजं नगराद् बहिः आसीत्

**प्रश्न 2. चाणक्यः किम् धृत्वा शयनं करोति स्म?**

**उत्तरम्:** चाणक्यः जीर्णकम्बलं धृत्वा शयनं करोति स्म

**प्रश्न 3. कः विरक्तः तृप्तश्चासीत् ?**

**उत्तरम्:** चाणक्यः विरक्तः तृप्तश्चासीत्

**प्रश्न 4. पण्डितः परदारेषु कथं पश्यति?**

**उत्तरम्:** पण्डितः परदारेषु मातृवत् पश्यति

**प्रश्नः5. रेखांकितपदानि आधृत्य प्रश्न-निर्माणं कुरुत**

(i) चन्द्रगुप्त: मगधदेशस्य नृपः आसीत्
(ii) तस्य मन्त्री चाणक्यः आसीत्
(iii) स: वैराग्यभावनया पूर्णः आसीत्
(iv) कम्बलान् दरिद्रेभ्यः दातुं नृपः सूचितवान्
(v) चाणक्यस्य उटजं नगराद् बहिः आसीत्
(vi) चाणक्यः जीर्णकम्बलेन सह सुप्तः आसीत्
(vii) ततः ते चौरकार्य व्यक्तवन्तः

**उत्तरम्:** प्रश्न-निर्माणम्
(i) चन्द्रगुप्तः कस्य नृपः आसीत्?
(ii) तस्य मन्त्री कः आसीत्?
(iii) सः कया पूर्णः आसीत्?
(iv) कम्बलान् केभ्यः दातुं नृपः सूचितवान्?
(v) चाणक्यस्य उटणं कुत्र आसीत्?
(vi) चाणक्यः केन सह सुप्तः आसीत्?
(vii) ततः ते किम् व्यक्तवन्तः?

**प्रश्नः6. रेखांकितपदानां स्थाने कोष्ठके लिखितान् पदान् चित्वा प्रश्ननिर्माणं कुरुत**
(क) नृपेण चाणक्याय कम्बलाः समर्पिताः। (कया/केन)
(ख) चौरा: रात्रौ चाणक्यस्य उटज प्राविशन् ।(कस्य/कस्याम्)
(ग) चाणक्यः जीर्णकम्बलं धृत्वा शेते। (का/कः)
(घ) ते दरिद्रेभ्यः दातव्याः। (केभ्य:/काभ्याम्)
(ङ) इदं श्रुत्वा चौरा: लज्जीभूताः जाताः। (को:/के)

**उत्तरम्:** प्रश्ननिर्माणम्
(क) केन चाणक्याय कम्बलाः समर्पिता:?
(ख) चौराः रात्रौ कस्य उटज प्राविशन्?
(ग) कः जीर्णकम्बलं धृत्वा शेते?
(घ) ते केभ्यः दातव्याः?
(ङ) इदं श्रुत्वा के लज्जीभूताः जाता:?

**प्रश्नः7. समानार्थक पदानि मेलयत**
(i) उटजेधनम् – शयानः
(i) अपहर्तुम् – कुट्याम्
(iii) कटे – कटस्य
(iv) सुप्तः – उपरि
(v) तपोधनः – चोरयितुम्
(vi) द्रव्यम् – कुट्याम्

**उत्तरम्:**
(i) उटजे – चोरयितुम्

(ii) अपहर्तुम् – कटस्य
(iii) कटे – उपरि
(iv) सुप्तः – शयानः
(v) तपोधनः – तपस्वी
(vi) द्रव्यम् – धनम्

**पाठ-परिचय**

प्रस्तुत पाठ में मगधदेश के राजा चन्द्रगुप्त के प्रधानमन्त्री चाणक्य की कर्तव्य-निष्ठा से सम्बन्धित एक कथा के माध्यम से दूसरों की वस्तुओं, धन आदि का उपभोग स्वयं के लिए न करने की एवं कर्तव्य-पालन की सुन्दर प्रेरणा दी गई है।

**पाठ के कठिन**

शब्दार्थ-नृपः (भूपति) = राजा। तपोधनः (तपस्वी) = तपस्वी। उटजे (कुट्याम्) = कुटिया में। वैराग्यम् (निसङ्गता) = विरक्ति। अपहर्तुम् (चोरयितुम्) = चोरी करने के लिए। शैत्यं (शीतलता) = सर्दी। कटे (कटस्य उपरि) = चटाई पर। सुप्तः (शयान:) = सोया हुआ। प्रबोधितवन्तः (जागरणं कृतवन्तः) = जगाकर। द्रव्यम् (धनं) = धन। अपहरामः (चोरयामः) = चुराते हैं।

**पाठ का हिन्दी-अनुवाद एवं पठितावबोधनम्**

(1) चन्द्रगुप्तः मगधदेशस्य नृपः आसीत्। तस्य मन्त्री चाणक्यः तपोधनः राजतन्त्रज्ञः च आसीत्। मन्त्री अपि स एकस्मिन् उटजे निवसति स्म। वैराग्यभावनया सः पूर्णः आसीत्। एकदा नृपेण चाणक्याय कम्बलाः समर्पिताः। तान् कम्बलान् दरिद्रेभ्यः दातुं नृपः सूचितवान्।

हिन्दी-अनुवाद-चन्द्रगुप्त मगध देश का राजा था। उसका मन्त्री चाणक्य तपस्वी और राजतन्त्र का जानकार (राजनीति में निपुण) था। मन्त्री होते हुए भी वह एक झोंपड़ी (कुटिया) में रहता था। वह वैराग्य (विरक्ति) की भावना से परिपूर्ण था। एक बार राजा ने चाणक्य के लिए कम्बल दिए। उन कम्बलों को गरीबों को देने के लिए राजा ने आदेश प्रदान किया।

♦ पठितावबोधनम्

निर्देशः- उपर्युक्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखतप्रश्नाः-
(क) मगधदेशस्य नृपः कः आसीत्?
(घ) चाणक्यः कस्य मन्त्री आसीत्?
(ग) चाणक्यः कीदृशः आसीत्?
(घ) मन्त्री अपि सः कुत्र निवसति स्म?
(ङ) नृपेण कस्मै कम्बला; समर्पिता:?
(च) ‘दातुम्’ पदे कः प्रत्ययः?
(छ) नृपः कम्बलान् केभ्य: दातुं सूचितवान्?।

**उत्तर:**
(क) मगधदेशस्य नृपः चन्द्रगुप्तः आसीत्।
(घ) चाणक्य: चन्द्रगुप्तस्य मन्त्री आसीत्।
(ग) चाणक्य: तपोधन; राजतन्त्रज्ञः वैराग्यभावनया पूर्णः च आसीत्।
(घ) मन्त्री अपि सः एकस्मिन् उटजे निवसति स्म।
(ङ) नृपेण चाणक्याय कम्बला: समर्पिता:।
(च) 'तुमुन्' प्रत्ययः।
(छ) नृपः कम्बलान् दरिद्रेभ्य: दातुं सूचितवान्।

(2) चाणक्यस्य उटजं नगराद् बहिः आसीत्। केचन चौरा: कम्बलान् अपहर्त चिन्तितवन्तः। ते एकदा रात्री चाणक्यस्य उटज प्राविशन्। मध्यरात्रिसमये शीतकाले अतीव शैत्यम् आसीत्। तथापि चाणक्यः जीर्णकम्बलेन सह सुप्तः आसीत्। पार्वे नूतनकम्बलानां राशिः एव आसीत्। चौराणाम् आश्चर्यं जातं यत् पाश्र्वे नूतनकम्बलानां राशिरेवास्ति तथापि चाणक्यः जीर्णकम्बलं धृत्वा शेते।

हिन्दी-अनुवाद-चाणक्य की कुटिया नगर से बाहर थी। कुछ चोरों ने कम्बलों की चोरी करने के लिए। विचार किया। वे एक बार रात को चाणक्य की कुटिया में प्रवेश कर गये। सर्दी के समय आधी रात को अत्यधिक सर्दी थी। फिर भी चाणक्य पुराने कम्बल के साथ ही सो रहा था। पास में नये कम्बलों का ढेर रखा हुआ था। चोरों को आश्चर्य हुआ कि पास में नये कम्बलों का ढेर रखा हुआ है फिर भी चाणक्य पुराने कम्बल को ही धारण करके सो रहा है।

♦ पठितावबोधनम्

निर्देशः-उपर्युक्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखतप्रश्नाः-
(क) चाणक्यस्य उजं कुत्र आसीत्?
(ख) केचन चौराः किं चिन्तितवन्त:?
(ग) चाणक्य: केन सह सुप्तः आसीत्?
(घ) तस्य पाश्र्वे केषां राशिः आसीत्?
(ङ) 'अतीव' पदस्य सन्धिविच्छेदं कुरुत।
(च) चौरा: रात्रौ कुत्र प्राविशन्?

**उत्तर:**
(क) चाणक्यस्य उजं नगराद् बहिः आसीत्।
(ख) केचन चौराः कम्बलान् अपहर्तुं चिन्तितवन्तः।
(ग) चाणक्य: जीर्णकम्बलेन सह सुप्तः आसीत्।
(घ) तस्य पाश्र्वे नूतनकम्बलानां राशिः आसीत्।
(ङ) अति + इव।
(च) चौरा: रात्रौ चाणक्यस्य उटजं प्राविशन्।

(3) चौराः चौर्यं न अकुर्वन् ते चाणक्यं प्रबोधितवन्तः। चौराः–"महोदय! तव पाश्र्वे नूतनकम्बलानां राशिः अस्ति तथापि जीर्णकम्बलं धृत्वा किमर्थं शयनं करोति ?" इत्यपृच्छन्। चाणक्यः उक्तवान् 'कम्बलाः नृपेण दत्ताः। ते

दुरिदेभ्यः दातव्याः। अतः श्वः प्रभाते वितरणे करिष्यामि। तेषां उपयोग कर्तुं मम न अधिकारः। अहं विरक्तः सदा तृप्तः इति।"

हिन्दी-अनुवाद-चोरों ने चोरी नहीं की, उन्होंने चाणक्य को जगाया। चोरों ने—" महोदय ! तुम्हारे पास नये कम्बलों को ढेर है, फिर भी पुराने कुम्बल को लेकर (धारण कर) किसलिए सो रहे हो?" ऐसा पूछा। चाणक्य ने कहा-"कम्बल राजा के द्वारा दिये गये हैं। वे गरीबों को देने के लिए हैं। इसलिए कल सुबह इनका वितरण करूंगा। उनका उपयोग करने में मेरा अधिकार नहीं है। मैं विरक्त हूँ, हमेशा तृप्त (सन्तुष्ट) हुँ।'

♦ पठितावबोधनम्

निर्देशः–उपर्युक्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखतप्रश्नाः-
(क) चौराः किं न कृत्वा कम् प्रबोधितवन्तः?
(ख) कम्बलाः केन दत्ताः? ते केभ्यः च दातव्याः?
(ग) चाणक्यः प्रभाते केषां वितरणं करिष्यति?
(घ) केषाम् उपयोग कर्तुं चाणक्यस्य अधिकार : नास्ति?
(ङ) 'अपृच्छन्' पदे कः लकारः? किं वचनम्?
(च) क; विरक्तः सदा तृप्तः च?।

**उत्तरः**
(क) चौरा; चौयं न कृत्वा चाणक्यं प्रबोधितवन्तः।
(ख) कम्वलाः नृपेण दत्ताः। ते दरिद्रेभ्यः दातव्याः।
(ग) चाणक्यः प्रभाते कम्बलानां वितरणं करिष्यति।
(घ) नृपेण प्रदत्तकम्बलानाम् उपयोगं कर्तुं चाणक्यस्य अधिकारः नास्ति।
(ङ) लङ्लकारः, बहुवचनम्।
(च) चाणक्यः विरक्तः सदा तृप्तः च।

(4) इदं श्रुत्वा चौराः लज्जीभूताः। अन्येषां व्यस्य उपयोगेन अधर्मः भवति इति चाणकस्य विचारः अस्ति। वर्षे जीवने प्रतिदिनम् अन्यस्य देव्यमेव अपहरामः। अधर्म कुर्मः। पापस्य सङ्ग्रहः भवति इति चिन्तयित्वा ते चाणक्यमहामात्यात् क्षमा प्रार्थितवन्तः। ततः ते चौरकार्य त्यक्तवन्तः।

मातृवत्परदारेषु, परद्रव्येषु लोष्ठवत्।
आत्मवत् सर्वभूतेषु, यः पश्यति स पण्डितः ॥

हिन्दी-अनुवाद-यह सुनकर चोर लज्जित हो गये। दूसरों के द्रव्य (धन) का उपयोग करने से अधर्म होता है, यह चाणक्य का विचार है। हम जीवन में प्रतिदिन दूसरों को ही धन चुराते हैं। अधर्म करते हैं। पाप का संग्रह ' होता है, ऐसा सोचकर उन्होंने महामन्त्री चाणक्य से क्षमा-प्रार्थना की। उसके बाद उन्होंने चोरी करना छोड़ दिया।
दूसरों की स्त्रियों को माता के समान, दूसरों के धन को मिट्टी के समान तथा सभी प्राणियों को अपने समान जो देखता है, वही पण्डित (विद्वान्) है।

♦ पठितावबोधनम्

निर्देशः-उपर्युक्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखतप्रश्नाः –
(क) चाणक्यस्य कः विचार:?
(ख) वयं जीवने प्रतिदिनं किम् अपहराम:?
(ग) चौरा: कस्मात् क्षमा प्रार्थितवन्तः?
(घ) ते किम् त्यक्तवन्तः?
(ङ) “श्रुत्वा' पदे कः प्रत्ययः?
(च) पण्डितः सर्वभूतेषु कथं पश्यति?

**उत्तर:**
(क) अन्येषां द्रव्यस्य उपयोगेन अधर्मः भवति, इति चाणक्यस्य विचार:।
(ख) वयं जीवने प्रतिदिनम् अन्यस्य द्रव्यम् अपहरामः।
(ग) चौरा: चाणक्यमहामात्यात् क्षमा प्रार्थितवन्तः।
(घ) ते चौर्य त्यक्तवन्तः।
(ङ) “क्त्वा' प्रत्ययः।
(च) पण्डितः सर्वभूतेषु आत्मवत् पश्यति।